संस्कृत

ग्रं. नं. २३८

स्तोत्र

शीतलाष्टक

५९८। श्लो. २९८

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

॥ श्रीगणेशाय नमः ॥ अस्य श्रीशीतलाष्टकस्तोत्रमंत्रस्य
वामदेव ऋषिः अनुष्टुप्छंदः शीतलादेवता ह्रीं बीजं तं शक्तिः
(1) लं कीलकं ॥ शरीरे सर्वरोगोपशमनार्थं अनेकविस्फोटकपीडापरि
हारार्थं क्षिप्रारोग्यार्थं शीतलाष्टकस्तोत्रस्य अमुकआवर्तस्याज
पमार्जने शीतलादेवीप्रीत्यर्थं जपे विनियोगः ॥ शीं हृदं तं शिर
से लं शीखाये शीं कवचा तं नेत्रत्रय लं अस्त्राय ॥ अथ ध्यानं ॥
सजलजलदश्यामां रक्तांगधातुलेपनां ॥ तुंगस्तनीं विशालाक्षीं
नानालंकारभूषितां ॥१॥ लसंतनुं नवं बिंबा ग्न्यारवरारूढा सुशो
भनां ॥ हस्ताभ्यां मार्जनीं शूर्पं दधानां नग्निकां स्मरेत् ॥ मार्ज
न्यां मार्जितान् स्फोटान् रोगान् नन्यां अदारणान् ॥ शूर्पे ह तां भ
सिक्षारे प्रक्षिपंतीं मुहुर्मुहुः ॥३॥ नमामि शीतलादेवीं रासभ

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

स्थां दिगंबरां ॥ मार्जनी कलशोपेतां स्पर्पालंकार मस्तकां ॥ मानसो
पचारैः संपूज्य ॥ स्कंद उवाच ॥ भगवन्न देवदेवेश शीतलायाः स्त
(2) वं शुभं ॥ वक्तुमर्हस्य शेषेण विस्फोटकभयापहं ॥ १ ॥ ईश्वर उवा
च ॥ श्रृणु पुत्र प्रवक्ष्यामि शीतलायाः स्तवं शुभं ॥ यस्य स्मरणमात्रे
ण विस्फोटा यांति मार्दवं ॥ ॥ वंदेहं शीतलां देवीं सर्वरोगभयाप
हां ॥ यामासाद्य निवर्तेत विस्फोटकभयं महत् ॥ २ ॥ शीतले शीतले
चेति यो ब्रूयाद्दाहपीडितः ॥ विस्फोटकभयं घोरं क्षिप्रं तस्य प्रण
श्यति ॥ ३ ॥ यस्त्वामुदकमध्ये तु ध्यात्वा संपूजयेन्नरः ॥ विस्फोट
कभयं घोरं गृहे तस्य न जायते ॥ ४ ॥ शीतले ज्वरदग्धस्य पूतिगं
धयुतस्य च ॥ प्रणष्टचक्षुषः पुंसः त्वामेकाजीवनौषधं ॥ ५ ॥ राम
शीतले तनुजान्रोगान्नृणां हरसि दुस्त्यजान् ॥ विस्फोटक १

दिग्वीणीनां त्वमेकामृतवर्षिणी ॥६॥ गलगंडग्रहा रोगा ये चान्ये
दारुणा नृणां ॥ त्वदनुध्यानमात्रेण शीतले यांति संक्षयं ॥७॥ न
मंत्रं नोषधं किंचित् पापरोगस्य विद्यते ॥ त्वमेका शीतले धात्री नान्यां
(2A) पश्यामि देवतां ॥८॥ मृणालतंतुसदृशीं नाभिहृन्मध्यसंस्थितां ॥
य स्त्वां संचिंतयेद्देवी तस्य मृत्युर्न जायते ॥९॥ ॥ आदौ अत्यु व
जन स्त्वां तु मुल मंत्रं जपेद्धीमान् ॥ शीतले शीतले इति मंत्रमुच्चारयेत्त
तः ॥१०॥ पुरश्चरण सहस्रं स्यात् वांछितं फलं ॥ रोगार्थी त्रिकालं
जपेत्वा स्त्वं ध्रुवारं पठेद्ध्रुवं ॥११॥ अष्टकं शीतलादेव्या यः पठेन्मानव न
वः सदा ॥ विस्फोटकोद्भवो घातो दुःखं तस्य न जायते ॥१२॥ अगाहद्वार
निदाघे दाहपापा या अपि कोटिशः ॥ निष्फला स्युर्जगन्मातस्त्वत्प्र
योगाय शीतले ॥१३॥ तार्क्ष्यपक्षाहतत्रस्ताः पलायंते यथाहयः

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

तथा तस्य ध्यानमात्रेण शीतले स्फोटजा भयाः॥१४॥ घोरः शारीरजो दा
हः पीडाविस्फोटकोद्भवा॥ न तस्य जायते यो वै शीतलां शरणं गतः॥
१५॥ शीतले त्वं जगन्माता शीतले त्वं जगत्पिता॥ शीतले त्वं जगद्धा
त्री शीतलायै नमोस्तु ते॥१६॥ श्रोतव्यं पठितव्यं च श्रद्धाभक्तिसमन्
(3) वितैः॥ उपसर्गविनाशाय परं स्वस्त्ययनं महत्॥१७॥ शीतला
ष्टकमेवेदं न देयं परस्य कस्यचित्॥ दातव्यं हि सदा तस्मै भक्तिश्र
द्धान्वितो लहेः॥१८॥ ॥ इति श्रीस्कंदपुराणे कार्तिकेयसदा
शिवसंवादे शीतलाष्टकस्तोत्रं संपूर्णमस्तु॥ ॥ ॥ ॥
तदंगकलशाद्यावाधनमर्तैकशिष्य॥ महिघोः पृथिवीत्वनस्त्यादि
पूर्णपात्रांतरसंस्थाप्य॥ जले पूर्णपात्रस्य वा स्वर्चयेज्जोगदवि राम
कौ॥ शिवामार्जनवल्कलान्यासं कुर्याद्यथाविधिः॥ षोडशोप २

(3A)

चारैश्च संपूज्यश्च यथाविधिः॥ रूणुष्व पाजइति सूक्तं समा
प्तिपर्यंतं प्रत्यर्धर्चे हिहाशास इत्यावर्तनीयं॥ रक्षोहणं वाजिन
माजिघर्मि मिति सूक्तं कुशेन मार्जनमथर्वनुदाहृत्तं॥ सो
वर्णं राजतं ताम्रं मन्मयं वा नवं दृढं॥ अग्निकुंडं शालंबं स्था
पयेत्तंडुलोपरि॥ तोयोदवंस मानीय पंचांश निर्मलमेव च॥ एवं स्था
तं कुशान्साग्नावरस्थापयेदग्न्योपरि॥ अनेन ज्वरस्तोत्रेण
नवकृत्वस्त्रिः कृत्वो वाज्वरितं कुशैः॥ संमार्ज्य अक्षीभ्यामिति
सूक्तं पठन् कुशामुष्टिं प्रतीचीं निरस्येत्॥ तथा च तत्सूक्तं॥ अक्षी
भ्यां ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि॥ यक्ष्मं शीर्षण्यं
मस्तिष्काज्जिह्वाया विवृहामि ते॥ ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसा

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

भ्यो अनूक्यात् ।। यक्ष्मं दोषण्य१ मंसाभ्यां बाहुभ्यां विवृहामि ते ।। आं
(5) त्रेभ्यस्ते गुदाभ्यो वनिष्ठोर्हृदयादधि ।। यक्ष्मं मतस्नाभ्यां यक्नः प्ला
शिभ्यो विवृहामि ते ।। ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्यां ।।
यक्ष्मं श्रोणिभ्यां भासदाद्भंससो विवृहामि ते ।। मेहनाद्वनंकरणा
ल्लोमभ्यस्ते नखेभ्यः ।। यक्ष्मं सर्वस्मादात्मनस्तमिदं विवृहामि
ते ।। अंगादंगाल्लोम्नोलोम्नो जातं पर्वणिपर्वणि ।। यक्ष्मं सर्व
स्मादात्मनस्तमिदं विवृहामि ते ।। इति गरुडपुराणे मृत्युष्टकं नु
दाहर्तं ।। ।। कृणुष्व पाजः प्रसितिं न पृथ्वीं · दशाश्वसो · त्वष्टीम
नुप्रशिस · दशाशासो · तरन्नमास · दहाशासो · नपृष्व अग्ने · दशाशा · राम
प्रतिस्पशो · दशाशासो · यो नो दूरे · दशाशा · उदग्ने तिष्ठ · दशाशा · ३

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

योनोअराति॑ं• दहाशासो• दुर्धोभव• दहाशासो• अवस्थिरातनुहि• द
हाशा०॥१॥ सजोजानाति• दहाशा• विश्वान्यस्मैसु• दहाशा• सेदग्नेअ
6A) स्तु• दहाशा• पीप्रीषतिरव• दहाशासो• अनीमिते• दहाशा• स्वश्वास्त्वासु
रथा• दहाशासो• इहवारयीचरे• दहाशासो• क्रीळेतबलासु• दहाशा•
यस्त्वास्वश्वःसु• दहाशा• तस्पथाता•॥२॥ महोतवामि• दहाशा• तत्वोअ
स्य• दहाशा• अस्वप्नज• दहाशा• तेपायवः स• दहाशासो• येपायवोमा•
दहाशा• ररक्षतांत्सुक्रू• दहाशासो• त्वयावयंसधु• दहाशा• उभाशंसा•
दहाशा• त्वयातेअग्नेसमिधा• दहाशा• दहाशासो• दहाशासो• तंत्वयो
रावणीमहे• श्रोंनमोब्रह्मणेनमो• चात्वारपिवी श्रों शांतिः शांतिः शां
तिः॥ एतत्सहस्रस्यस्तोत्रस्यमार्कंडेयपुराणे कथितंरक्षाशामार्जनंत्रि
तव्यस्यादशदशा अष्टवारंरत्या जपेत्॥ शीतलेजगदंबापीणमस्तु॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com